रीतीकृ, वैपरीत्यं कृ, विपर्य्ययं कृ, व्यत्यस्तं -स्तां कृ, विपर्य्यस्तं -स्तां कृ, प्रतिकूलीकृ, विलोमीकृ.—(Turn upside down) अधोमुखीकृ, अधोमुखं -खां कृ, अधःकृ, अधरोत्तरीकृ, ऊर्द्धाधरीकृ, अपवृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्; 'invert the glass in water,' पात्रम् अधोमुखं जले स्थापय.

Inverted, *p. p.* विपर्य्यस्तः -स्ता -स्तं, व्यत्यस्तः -स्ता -स्तं, पर्य्यस्तः -स्ता -स्तं, व्यस्तः -स्ता -स्तं, विपरीतः -ता -तं, व्यतिक्रान्तः -न्ता -न्तं, व्युत्क्रान्तः -न्ता -न्तं, विलोमः -मा -मं, प्रतिलोमः -मा -मं, प्रतिकूलः -ला -लं, प्रसव्यः -व्या -व्यं, प्रतिसव्यः -व्या -व्यं.—(Turned upside down) अधोमुखीकृतः -ता -तं, अधोमुखः -खा -खं, अधःकृतः -ता -तं, अधरोत्तरः -रा -रं, अपवृत्तः -त्ता -त्तं.

*To* invest, *v. a.* (Dress, clothe) वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, प्रवेष्ट्, आच्छद् (c. 10. -छादयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), संव्ये (c. 1. -व्ययति -व्यातुं), परिव्ये, परिधा in caus. (-धापयति -यितुं), वस् (c. 10. वासयति -यितुं), विवस्.—(Invest with office) अधिकारे नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. योजयति -यितुं), अधिकारं प्रविश् (c. 10. -वेशयति -यितुं), अधिकारयुक्तं -क्तां कृ, अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), संस्कारपूर्व्वम् अधिकारप्रवेशं कृ.—(Adorn) अलङ्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्.—(Indue, place in possession) युक्तं -क्तां कृ, सम्पन्नं -न्नां कृ, विशिष्टं -ष्टां कृ, उपेतं -तां कृ, अन्वितं -तां कृ, नियुज्, युज्.—(Inclose, besiege) परिवेष्ट्, उद्वेष्ट्, समन्ताद् रुध् (c. 7. रुणद्धि, रोद्धुं) or उपरुध् or अवरुध्.—(Invest money) क्षेत्रगृहादि क्रीत्वा धनं प्रयुज्, धनप्रयोगं कृ.

Invested, *p. p.* (Clothed) वेष्टितः -ता -तं, आच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, परिहितः -ता -तं, संवीतः -ता -तं, आश्लिष्टः -ष्टा -ष्टं.—(With office) अधिकारे नियुक्तः -क्ता -क्तं, पदयुक्तः -क्ता -क्तं, पदविशिष्टः -ष्टा -ष्टं.—(Indued, placed in possession) युक्तः -क्ता -क्तं. *See To* Invest.—(Closed, besieged) परिवेष्टितः -ता -तं, उद्वेष्टितः -ता -तं, रुद्धः -द्धा -द्धं, समन्तादुपरुद्धः -द्धा -द्धं, पर्य्यवष्टब्धः -ब्धा -ब्धं, बाधितः -ता -तं.—(As money) प्रयुक्तः -क्ता -क्तं.

Investigable, *a.* निरूपणीयः -या -यं, निरूप्यः -प्या -प्यं, विचारणीयः -या -यं, विचार्य्यः -र्य्या -र्य्यं, अनुसन्धेयः -या -यं, निर्णेयः -या -यं, विचारयोग्यः -ग्या -ग्यं.

*To* investigate, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), समीक्ष्, अवेक्ष्, निरीक्ष्, विचर् (c. 10. -चारयति -यितुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं), अन्वेष् (c. 1. -एषते -षितुं), आलोच् (c. 10. -लोचयति -यितुं), आलोक् (c. 10. -लोकयति -यितुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विमृश् (c. 6. -मृशति -म्रष्टुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, विभू (c. 10. -भावयति -यितुं), चर्च् (c. 1. चर्चति -र्चितुं), मार्ग् (c. 10. मार्गयति -यितुं), मन् in des. (मीमांसते -सितुं), अभिनिध्यै (c. 1. -ध्यायति -ध्यातुं), विवेचनां कृ.

Investigated, *p. p.* निरूपितः -ता -तं, परीक्षितः -ता -तं, निरीक्षितः -ता -तं, अवेक्षितः -ता -तं, विचारितः -ता -तं, जिज्ञासितः -ता -तं, अन्वेषितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, आलोचितः -ता -तं, चर्चितः -ता -तं.

Investigating, *part.* निरूपयन् -यन्ती -यत् (त्), परीक्षकः -का -कं, अन्वेषी -षिणी -षि (न्), अनुसन्धानी -निनी -नि (न्), अनुसन्धायी &c., विचारी &c.

Investigation, *s.* निरूपणं, अनुसन्धानं, परीक्षा -क्षणं, विचारः -रणं -णा, जिज्ञासा, अन्वेषणं -णा, निरीक्षणं, अवेक्षा -क्षणं, समीक्षणं, संवीक्षणं, प्रसमीक्षा, निर्णयः, निश्चयः, अनुयोगः, विवेचना, विवेकः, चर्चा, विमर्शः, निरूपत्वं, परीष्टिः *f.*; 'under investigation,' निश्चीयमानः -ना -नं, विचार्य्यमाणः -णा -णं, निरूप्यमाणः -णा -णं.

Investigator, *s.* परीक्षकः, विचारकः, निरूपयिता *m.* (तृ), अनुसन्धायी *m.* (न्), अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), निर्णेता *m.* (तृ), चर्चाकारी *m.* (न्).

Investiture, *s.* (Investing with any office) प्रतिष्ठापनं, प्रतिष्ठा, अभिषेकः, अभिषेचनं, अधिकारप्रवेशकरणं, पदस्थापनं -ना.—(With the sacrificial cord, or yajnopavīta) उपनयः -यनं, आनयः -यनं, मौञ्जीबन्धनं, पवित्रारोपणं.

Investment, *s.* (Clothes) परिधानं, आच्छादनं, वस्त्रं.—(Besieging, surrounding) अवरोधः -धनं, प्रतिरोधः, रोधः, वेष्टनं, परिवेष्टनं -वेष्टः, उद्वेष्टः, पर्य्यवष्टम्भनं.—(Laying out money) धनप्रयोगः.

Inveteracy, *s.* बद्धमूलता, निर्बन्धः, अभिनिवेशः, दृढता, स्थिरता, अभिनिविष्टता, चिरकालिकत्वं, बहुकालिकत्वं.

Inveterate, *a.* बद्धमूलः -ला -लं, दृढमूलः -ला -लं, दृढः -ढा -ढं, स्थिरः -रा -रं, निर्बद्धः -द्धा -द्धं, चिरस्थायी -यिनी -यि (न्), बहुकालिकः -की -कं, चिरकालिकः -की -कं, चिरकालीनः -ना -नं, अभिनिविष्टः -ष्टा -ष्टं; 'inveterate hatred,' बद्धवैरं, अच्युतवैरं; 'an inveterate fool,' प्रतिनिविष्टमूर्खः.

Inveterateness, *s.* *See* Inveteracy.

Invidious, *a.* (Envious) मत्सरी -रिणी -रि (न्), समत्सरः -रा -रं, ईर्षी -र्षिणी -र्षि (न्), ईर्ष्यालुः -लुः -लु.—(Likely to provoke envy or ill-will) ईर्ष्याकरः -रा -रं, ईर्ष्याजनकः -का -कं, असूयाजनकः -का -कं, असूयोत्पादकः -का -कं, मात्सर्य्यजनकः -का -कं, मत्सरावहः -हा -हं, द्वेषजनकः -का -कं, द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, कुत्सितः -ता -तं, अप्रीतिजनकः -का -कं.

Invidiously, *adv.* (Enviously) समत्सरं, समात्सर्य्यं, सासूयं, सेर्ष्यं.—(In a manner so as to provoke hatred) यथा द्वेषः or असूया जायते तथा, यथा मात्सर्य्यम् उत्पद्यते तथा.

Invidiousness, *s.* द्वेषजनकत्वं, असूयाजनकत्वं, ईर्ष्याजनकत्वं.

*To* invigorate, *v. a.* बलं वृध् (c. 10. वर्धयति -यितुं), तेजो वृध् or कृ or दा, वीर्य्यं or सत्त्वं वृध् or दा, अग्निं or रुचिं दा or वृध्, सबलं -लां कृ, सबलीकृ, सवीर्य्यं -र्य्यां कृ, पुष् (c. 10. पोषयति -यितुं), पुष्टिं कृ or दा or वृध्, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, दीप् (c. 10. दीपयति -यितुं).

Invigorated, *p. p.* वर्धितबलः -ला -लं, वर्धिततेजाः -जाः -जः (स्), वृद्धसत्त्वः -त्त्वा -त्त्वं, तेजितः -ता -तं, पुष्टः -ष्टा -ष्टं, दीपितः -ता -तं, प्रदीप्तः -प्ता -प्तं, आप्यायितः -ता -तं.

Invigorating, *a.* बलवर्धकः -का -कं, बलवर्धी -र्धिनी -र्धि (न्), तेजस्करः -रा -रं, तेजोवर्धकः -का -कं, पुष्टिदः -दा -दं, पुष्टिकारकः -का -कं, पौष्टिकः -की -कं, वीर्य्यदः -दा -दं, सत्त्ववर्धकः &c., दीपकः -का -कं.

Invigoration, *s.* (The act) बलवर्धनं, तेजोवर्धनं, सत्त्ववर्धनं, पुष्टिकरणं.—(State) बलवृद्धिः *f.*, तेजोवृद्धिः *f.*

Invincible, *a.* अजेयः -या -यं, अजय्यः -य्या -य्यं, दुर्जयः -या -यं, दुर्जेयः -या -यं, अदम्यः -म्या -म्यं, अदमनीयः -या -यं, अपराजेयः -या -यं, अपराजेतव्यः -व्या -व्यं, अपराजितः -ता -तं, अपराभाव्यः -व्या -व्यं, अप्रधृष्यः -ष्या -ष्यं, सर्व्वजित् *m. f. n.*

Invincibleness, *s.* अजेयता -त्वं, दुर्जेयता, अपराजेयत्वं, अदम्यता.

Invincibly, *adv.* अजेयं, अपराजेयं, अदमनीयं, यथा जेतुं न शक्यते.

Inviolable, *a.* (Not to be broken) अलंघ्यः -घ्या -घ्यं, अलंघनीयः -या -यं, अभेद्यः -द्या -द्यं, अनतिक्रमणीयः -या -यं, अनतिक्रम्यः -म्या